"असमानसमानतासखसुतावैवाहिकशालक-
न्यभूकासुकरयया गतवती न्याय्या तदेषा मम॥")
विवाहसम्बन्धिनि, त्रि। यथा,—
"पञ्चमे सप्तमे चैव येषां वैवाहिकी क्रिया।
ते च साम्तानिनः सर्व्वे पतिताः शूद्रतां गताः॥"
इत्युद्वाहतत्त्वम्॥
अपि च।
"कन्याभ्यश्च पितृद्रव्याद्देयं वैवाहिकं वसु।
अपुत्रकस्य कन्या स्वा धर्म्मजा पुत्त्रवद्धरेत्॥"
इति दायतत्त्वे देवलः॥
(यथा च मनुः। २। ६७।
"वैवाहिको विधिः स्त्रीणां संस्कारो वैदिकः
स्मृतः॥")

वैशम्पायनः, पुं, (विशम्पस्य गोत्रापत्यम्। "अश्वादिभ्यः फञ्।" ४।१।११०। इति फञ्।) मुनिविशेषः। यथा,—
"अथ शिष्यान् प्रजग्राह चतुरो वेदपारगान्।
जैमिनिञ्च सुमन्तुञ्च वैशम्पायनमेव च॥
पैलं तेषां चतुर्थञ्च परमं मां महामुनिः।
ऋग्वेदश्रावकं पैलं जग्राह स महामुनिः।
यजुर्व्वेदप्रवक्तारं वैशम्पायनमेव च॥"
इति कौर्म्मे ४६ अध्यायः॥
स च वज्रवारकः। यथा,—
"जैमिनिश्च सुमन्तुश्च वैशम्पायन एव च।
पुलस्त्यः पुलहश्चैव पञ्चैते वज्रवारकाः॥"
इति पुराणम्॥

वैशस्त्यं, क्ली, (विशसितुर्धर्म्मोऽम्। विशसितृ + "ऋतोऽञ्।" ४।४।४६। इति अञ्। तत्र "विशसितुरिड्लोपश्च।" इति काशिकोक्त्या इड्लोपः।) अधिकारः। शस्त्राभावविशिष्टत्वम्। विगतं शस्त्रं यत्र। विपूर्व्वशस्त्रशब्दादण्प्रत्ययेन निष्पन्नमिदम्। इति सिद्धान्तकौमुदी॥

वैशाखं, क्ली, (विशाख एव। स्वार्थे अण्।) धनुर्व्विदां संस्थानभेदः। यथा,—
"स्थानान्यालीढवैशाखप्रत्यालीढानि मण्डलम्।
समपादञ्च————————————।"
इति हेमचन्द्रः॥
(यथा, हरिवंशे। ९१०। ४४।
"वज्रपातनिभं वेगं पातयित्वा ममोपरि।
भूयः प्रहर्त्तुकामो मां वैशाखेनास्थितो
महीम्॥"
पुरविशेषः। यथा, कथासरित्सागरे। ६७।५।
"वैशाखाख्ये पुरे राज्ञः पुत्रावावां द्विमातृकौ॥")

वैशाखः, पुं, (विशाखा प्रयोजनमस्य। विशाखा + "विशाखाषाढादिति।" ५।१।११०। इति अण्।) मन्थानदण्डः। (यथा, शिशुपालवधे। ११।८।
"द्रुततरकरदक्षाः क्षिप्तवैशाखशैले॥"
वैशाखी पौर्णमासी अस्मिन्। "सास्मिन् पौर्णमासीति।" ४।२।२१। इति अण्।) द्वादशमासान्तर्गतप्रथममासः। तत्पर्य्यायः। माधवः २ राधः ३। इत्यमरः॥ चान्द्रस्य तस्य लक्षणम्।
"विशाखातारकायुक्ता वैशाखी पूर्णिमा भवेत्।
सा वैशाखी यत्र मासि स वैशाखः प्रकीर्त्तितः॥"
इति शब्दरत्नावली॥
स तु मेषस्थरविकः सौरः। तत्र जातफलम्।
"पुमान् विनीतो द्विजदेवभक्तो
धर्म्मस्य कर्त्ता सुजनस्य भर्त्ता।
गुणाभिरामोऽथ जगत्प्रियः स्यात्
वैशाखमासे खलु जन्म यस्य॥"
इति कोष्ठीप्रदीपः॥ *॥
अथ वैशाखकृत्यम्। तत्र पद्मपुराणम्।
"तुलामकरमेषेषु प्रातःस्नानं विधीयते।
हविष्यं ब्रह्मचर्य्यञ्च महापातकनाशनम्॥"
वैष्णवामृते।
"गवामर्द्धप्रसूतानां लक्षं दत्त्वा तु यत् फलम्।
तत् फलं लभते राजन् मेषे स्नात्वा तु जाह्नवीम्॥"
पितामहः।
"कार्त्तिकस्य तु यत् स्नानं माघे मासि विशेषतः।
शुक्लादिनियमाणाच्च चान्द्रमानप्रमाणतः॥"
आभ्यां कार्त्तिकादिस्नाने सौरचान्द्रयोर्व्विकल्पेनानुष्ठानम्। तच्च चान्द्रमपि द्विविधम्। तथा च विष्णुः।
"दर्शं वा पौर्णमासीं वा प्रारभ्य स्नानमाचरेत्।
पुण्यान्यहानि त्रिंशत्तु मकरस्थे दिवाकरे॥"
दर्शं दर्शान्तयागसम्बन्धिनीं प्रतिपदमारभ्य त्रिंशत्तिथिम्। नारायणोपाध्यायस्तु दर्शपौर्णमासीति पूर्व्वदिनसङ्कल्पपरमिति। तत्र सौरकृत्ये राश्युल्लेखः कार्य्यः।
"संक्रान्तिविहिते कार्य्ये संक्रान्तिः परिकीर्त्तिता।
मासोल्लेखश्चेतरस्मिन् रविराशिस्थितिस्तथा॥"
इति गारुडात्॥ *॥
ततश्चारुणोदयकाले मज्जनं कृत्वाचम्य उदङ्मुखः ॐ तत् सदित्युच्चार्य्य अद्य वैशाखे मासि अमुकपक्षे अमुकतिथावारभ्य मेषस्थरविं यावत् प्रत्यहं अमुकगोत्रः श्रीअमुकदेवशर्म्मा श्रीविष्णुप्रीतिकामः प्रातःस्नानमहं करिष्ये। इति। गङ्गायान्तु अर्द्धप्रसूतगवीलक्षदानजन्यफलसमफलप्राप्तिकामो विष्णुप्रीतिकामो वा इति सङ्कल्प्य यथोक्तविधिना स्नायात्। प्रतिदिनसङ्कल्पे तु आरभ्य मेषस्थरविं यावत् प्रत्यहमिति न वक्तव्यं किन्तु मासीयनन्तरं मेषराशिस्थरवौ इत्यधिकं वक्तव्यम्। चान्द्रे तु मास्यनन्तरं शुक्लपक्षे प्रतिपदि तिथावारभ्य दर्शपर्य्यन्तमित्यूहनीयम्। प्रतिदिनसङ्कल्पे त्वारभ्य प्रत्यहमित्यन्तं न वक्तव्यम्। एवं कृष्णप्रतिपदारम्भे ऊहनीयम्। एवं मासान्तरे चोहनीयम्। सङ्कल्पाकरणे फलहानिमाह भविष्यपुराणम्।
"सङ्कल्पेन विना राजन् यत्किञ्चित् कुरुते नरः।
फलञ्चाल्पाल्पकं तस्य धर्म्मस्यार्द्धक्षयो भवेत्॥" *
महार्णवे।
"यो ददाति हि मेषादौ शक्तूनम्बुघटान्वितान्।
पितॄनुद्दिश्य विप्रेभ्यः सर्व्वपापैः प्रमुच्यते॥
विप्रेभ्यः पादुकां छत्रं पितृभ्यो विषुवे शुभम्।"
पितृभ्यः पितॄनुद्दिश्य। अत्र विष्णुरहस्यम्।
"अयने कोटिगुणितं लक्षं विष्णुपदीषु च।
षडशीतिसहस्रन्तु षडशीत्यामुदाहृतम्॥
शतमिन्दुक्षये पुण्यं सहस्रन्तु दिनक्षये।
विषुवे शतसाहस्रमा-का-मा-वैष्वनन्तकम्॥"
इति मत्स्यपुराणोक्तशतसहस्रगुणिततत्कर्म्मफलजनकत्वेन विवक्षणीयत्वान्मेषादावित्यपि विषुवसंक्रान्तिपुण्यकालपरम्। अन्यथा कालद्वयकल्पनापत्तिः। व्यवहारोऽपि तथा॥ *॥ संक्रमणपुण्यकालस्तु दिनसंक्रमणे कृत्स्नं दिनम्।
"षडशीतिमुखेऽतीते वृत्ते च विषुवद्वये।
भविष्यत्ययने पुण्यमतीते चोत्तरायणे॥"
इति तु पुण्यतरकालपरं दिनवृत्तोत्तरायणादिविहितविंशतिदण्डादीनां रात्रिप्रविष्टभागस्यापि पुण्यत्वम्। रात्रिसंक्रमे तु दण्डन्यूनप्रथमयामद्वयाभ्यन्तरे तद्दिवसीयशेषयामद्वयं पुण्यम्। दण्डद्वयात्मकमध्यरात्रे तद्दिवसीयतिथेरभेदे तु तद्दिवसीयशेषयामद्वयं पुण्यम्। भेदे तु तद्दिवसीयशेषयामद्वयं पुण्यं परदिवसीयाद्ययामद्वयञ्च। तिथ्यभेदभेदयोर्दक्षिणायने तद्दिवसीयशेषयामद्वयम्। उत्तरायणे परदिवसीयशेषयामद्वयम्। दण्डाधिकशेषार्द्धरात्रिसंक्रमणे परदिनाद्ययामद्वयम्। सन्ध्यासंक्रमणे तु दिनदण्डे दिनस्य रात्रिदण्डे रात्रेर्व्यवस्थेति॥ *॥ संक्रान्त्यां स्नानमावश्यकम्। अनिष्टसंक्रमणे तु तद्दोषशान्त्यर्थं धुस्तूरबीजसलिलेन सर्व्वौषधिजलेन च स्नानं विष्णुपूजनं तन्मन्त्रजपः। संक्रान्तिकाल एव स्त्रीतैलमांसवर्ज्यम्। इन्दुक्षयेऽमावास्यायाम्। दिनक्षये तिथिक्षये। आ-का-मा-वैषु आषाढकार्त्तिकमाघवैशाखपौर्णमासीषु॥ *॥ ततः कृतस्नानादिः प्राङ्मुख उदङ्मुखं ब्राह्मणं गन्धपुष्पाभ्यां पूजयित्वा जलघटान्वितशक्तूंश्च जलघटान्वितशक्तुभ्यो नमः इति पूजयित्वा ब्राह्मणहस्ते जलं दत्त्वा घटं संप्रोक्ष्य वामहस्ते धृत्वा कुशत्रयतिलजलान्यादाय ॐ तत् सदित्युच्चार्य्य ओम् अद्यामुके मास्यमुकपक्षेऽमुकतिथौ महाविषुवसंक्रान्त्यां अमुकगोत्रस्य पितुरमुकदेवशर्म्मणः सर्व्वपापविमुक्तिकामः एतान् जलघटान्वितशक्तून् विष्णुदेवताकान् अमुकगोत्राय अमुकदेवशर्म्मणे ब्राह्मणाय तुभ्यमहं संप्रददानीति ब्राह्मणहस्ते जलं दद्यात् ब्राह्मणस्तु दक्षिणहस्ततलमध्यभागाग्नेयतीर्थेन ओमित्यनेन गृहीत्वा स्वस्तीत्युक्त्वा गायत्रीं कामस्तुतिञ्च पठेत्। जलघटान्विताः शक्तवो विष्णुदेवताकाः। इति वदेत्। ततो दक्षिणां दद्यात्। यथा ॐ अद्य-